International Journal of Sanskrit Research 2019; 5(6): 101-103

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(6): 101-103
© 2019 IJSR
www.anantaajournal.com
Received: 28-09-2019
Accepted: 30-10-2019

**डॉ. रत्नलाल**
ज्योतिषविभागाध्यक्षः
उत्तराखण्ड–संस्कृत–विश्वविद्यालयः,
हरिद्वारम्, उत्तराखण्ड, भारत

**राधेश्याम बहुखण्डी**
उत्तराखण्ड–संस्कृत–विश्वविद्यालयः,
हरिद्वारम्, उत्तराखण्ड, भारत

**Corresponding Author:**
**डॉ. रत्नलाल**
ज्योतिषविभागाध्यक्षः
उत्तराखण्ड–संस्कृत–विश्वविद्यालयः,
हरिद्वारम्, उत्तराखण्ड, भारत

# ज्योतिषशास्त्रे वनस्पति विज्ञानम्

**डॉ. रत्नलाल, राधेश्याम बहुखण्डी**

**प्रस्तावना**

संस्कृतवाङ्गमयं हि विश्ववाङ्गमयसमुदाये प्राचीनतमं मूर्धन्यञ्चेति। तत्रापि वैदिकवाङ्गमयतस्यामूलाधारः। वेद–वेदाङ्गानागणना 'अपराविद्यायां' क्रियते। यथा– तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः।

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। [1]

वेदवेदाङ्गेषु ज्योतिषशास्त्रं चक्षुष्ट्वेन स्मृयते। वेदस्य चक्षुचक्षुष्ट्वेन शास्त्रमिदं जगतस्यशुभाशुभचिन्तने समर्थः। अतैव वेदाङ्गषु ज्योतिषस्य प्राधन्यम्। यथोक्त लगधेन–

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्ग शास्त्राणां ज्योतिषमूर्धनि संस्थितम्।। [2]

ज्योतिषं स्कन्धत्रयात्मकः। सिद्धान्तसंहिताहोरा श्चेति। तत्र सिद्धान्तं तु गणितात्मकं, होराशास्त्रे जातकविचारः, सहितायां मानवोपयोगी विभिन्नविषयाः प्रतिपादिताः। यथोक्तम्–

ज्योतिः शास्त्रमनेक भेदविषयं स्कन्धत्रयाधिष्ठितं।
स्कन्धेऽस्मिन् गणितेन वा ग्रहगति तन्त्राभिधानस्त्वसौ।
होराऽन्योऽङ्गाविनिश्चसश्च कथितः स्कन्धस्तृतीयोऽपरः।। [3]

यद्यपि संहितास्कन्धेसमष्टिरूपेण विभिन्नविषयाः समाविष्टाः दृश्यन्ते। तथाप्याधुनिकसमये तेविषयाः स्वतन्त्ररूपेण प्रतिष्ठिताः वर्तन्ते। यथा–
जीवविज्ञानं–भौतिकविज्ञानं–मनोविज्ञानं–खगोलविज्ञानं–वनस्पतिविज्ञानमित्यादयाः।
आधुनिकवनस्पतिविज्ञानं विज्ञानवर्गीयजीवविज्ञानस्यशाखाभेदेन 'उद्भिद्शास्त्रं' आग्लभाषायां ठव्ज।छल नामाख्येन प्रसिद्धः। वैदिकवाङ्गमये–आयुर्विज्ञान ग्रन्थेष्वपि वनस्पति–विज्ञानं वर्णयते। यत्र वनस्पतिरूपेणाश्वत्थादिवृक्षाः मात्रग्राह्या। यथा–

नन्दीवृक्षोऽश्वत्थभेदः प्ररोहो गजपादपः।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्यात् वनस्पतिः।। [4]

आधुनिक विज्ञाने सर्वेस्थावराः अस्यान्तर्गताः परिगण्यन्ते। तेषामुत्पत्तिः–वर्गीकरणं–
अनुवांशिक–पारिस्थितिकमध्ययनमुद्भिद् शास्त्रे वर्णितम्। वनस्पत्यादीनां वर्गीकरणं स्मृतिवाङ्गमये कर्मफलानुसार चतुर्विधसृष्टिवर्णने प्राप्यते। यथा–

उद्भिजाः स्थावराः सर्वे बीजकाण्ड प्ररोहिणः।
ओषध्यः फलापाकान्ता बहुपुष्पफलोपगाः।।
अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः।
पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः।।
गुच्छगुल्मं तु विविधं तथैव तृणजातयः।
बीजकाण्डरुहाण्येष प्रताना वल्लय एव च। [5]

वनस्पतिविज्ञानं न केवलं मनुष्याणांकृतेऽपितु पशु–पक्षिणां कृतेऽपि कल्याणकारकः। यथोक्तम्–

वराहो वेद वीरुधं न कुलो वेद भेषजीम्।
सर्पा गन्धर्वा या विदुस्ता अस्मा अवसे हुवे।।
याः सुपर्णा आङ्गिरसीर्दिव्या या रघटो विदुः।
वयांसि हंसा या विदुर्याश्च सर्वे पतान्त्रिणः।।
मृगा या विदुरोषधीस्ता अस्मा अवसे हुवे।। [6]

अस्याशयः ऋषयाः प्रार्थयन्ते यत्–वराहः–नकुलः–सर्पः–हंसः–गौ प्रभृत्तयाः पशु–पक्षिणाः येषामोषधीनां महत्वं ज्ञायन्ते तेषामुपयोगमपि ज्योतिषशास्त्रे
बृहत्संहिता–भद्रबाहुसंहिता–नारदसंहिता–बृहत्पाराशहोराशास्त्रं–संहितास्कन्धे–देवज्ञवराहमिहिरकृत 'बृहत्संहिताया' वृक्षारोपणस्य महत्वं प्रतिपादितं यत् वृक्षाभावे जलाशयादीनामपि न शोभन्ते। यथोक्तम्–

प्रान्तच्छायाविनिर्मुक्ता न गनोज्ञा जलाशयाः।
यष्मादतो जलप्रान्तेष्वारामान् विनिशयेत्।। [7]

अपि च पौराणिक वाङ्गमये–

दशकूपसमावापि, दशवापीसमोह्रदः।
दशह्रदसमोपुत्रः, दशपुत्रसमोद्रुमः।।

वृक्षायुर्वेदाध्याये पुन्नागम् अशोक–शिरीषप्रभृत्तयाः औषधीयुक्तवृक्षाणां ग्रहेषु महत्वं वर्णयते। यथा–

अरिष्टाशोकपुन्नागशिरीषा सप्रियङ्गवः।
मङ्गल्याः पूर्वामारामे रोपणीया गृहेषु वा।। [8]

वृक्षारोपण नक्षत्राः ध्रुवनक्षत्राः–उत्तरात्रयाः–रोहिणी–रेवती–हस्त–पूर्वाषाढ़ा–शतभिषा–मूल प्रतिपादिताः। यथा–

गृह्णीयाद्रोपयेद्वृक्षान्द्विजं चन्द्रं प्रपूज्य च।
ध्रुवानि पञ्च वायव्यं हस्तं प्रणिशवैष्णवम्।। [9]

तथा च–

ध्रुवमृदुमूलविशाखगुरुभं श्रवणस्तथाश्विनीहस्तः।
उक्तानि दिव्यदृग्भिः पादपसंरोपणे।। [10]

हेमन्तशिशिरादि–ऋतुकालवशात् वृक्षारोपण निर्णय। यथा–

अजातशाखान् शिशिरे जातशाखान् हिमागमे।
वर्षागमे च सुस्कन्धान् यथादिक्स्थान् प्ररोपयेत्। [11]
तथा च–

वर्षारात्रौ भुवः शोषे रोक्तव्या रोपिता द्रुमाः।
उत्तमा विंशतिर्हस्ता मध्यमाः षोडशान्तराः।। [12

वृक्षारोपणस्य पूर्वोपवनस्य कृते भूमिचयनवृक्षपूजनादि ज्ञानमाक यथोक्तं वराहमिहिरेण। यथा–

शुचिर्भूत्वा तरोः पूजां कृत्वा स्नानुलेपनैः।
श्रोपयेद्रोयितश्चैव पत्रैस्तैरेव जायते।। [13]

अशोक–कदली–द्राक्षादि रोपणविधि बृहत्संहितायाम्। यथा–
एते द्रुमाकाण्डरोप्या गोमयेन प्रलेपिताः।
मूलोच्छेदऽथवा स्कन्धे रोपणीयाः परं ततः।। [14]

अथ वृक्षाणामध्येयतान्तरमपेक्षितं तद्वर्णितमाह। यथा–

उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्।
स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम्।। [15]

अथ वृक्षाणांरोगज्ञानमाह वराहमिहिरेणोक्तम्। यथा–

शीतवाततपेरोगो जायते पाण्डुपत्रता।
अवृद्धिश्च प्रवालानां शाखाशोषो रसस्रुतिः। [16]

महाभारतस्यनुशासनपर्वेऽपि वृक्षाणांमूर्च्छाविषयक चर्चा दृश्यते। यथा–

स तीक्ष्णविषयदिग्धेन शरेणातिबलात् क्षतः।
उत्सृज्य फलपत्राणि पादपः शोषमागतः।। [17]

अथचिकित्सावर्णनमाह। यथा–

चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम्।
विडङ्गघृतपङ्काक्तान् सेचयेत् क्षीरवारिणाम्।। [18]

वृक्षाणां यदा फलनाशो भवति तत्चिकित्सामाह। यथा–

फलनाशो कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः।
श्रृतशीतपयः सेकः फलपुष्पसमृद्धये।। [19]

न केवलं संहितास्कन्धेऽपितु होराशाखांमपि वियोनिजन्मविचार–स्थावरजन्मयोगप्रकरणे वनस्पतिनां चर्चां समुपलभ्यते। मनुष्येतरान्यजन्म 'वियोनि' इति। वियोनिजन्मयोग बृहज्जातके। यथा–

क्रूरैः सुबलसमेतैः सौम्यैर्विबलैर्वियोनिलग्ने वा।
सौम्यार्किभ्यां केन्द्रे तदोक्षिते वा नियोनिः स्यात्।। [20]

अथस्थावरजन्मयोग वर्णितमाह। यथा–

लग्नार्क जीवचन्द्रैरबलैः शेषेश्चमूलयोनिः स्यात्।
स्थलजलभवनविभागा वृक्षादीनां प्रभेदकराः।। [21]

सूर्यादीग्रहाणानुसार वृक्षाणामधिपतयाः वर्णितमाह। यथा–

सूर्यो जनयति स्थूलान् दुर्भगान् सूर्यपुत्रकः।
क्षीरोपेतांस्तथा चन्द्रः कटुकाद्यान् धरासुतः।।
पुष्पवृक्षं भृगोः पुत्रो गुरुर्ज्ञो सफलाफलौ।
नीरसान् सूर्यपुत्रश्च एवं ज्ञेया खगा द्विज।। [22]

अथ वनस्पत्याधारेण धान्यादिवृद्धयावृद्धि विचारमाह। यथा–

मकरे तरुगुल्माद्यं सैक्येक्षुसुवर्ण कृष्णलोहानि।
कुम्भे सलिलजफल कुसुमरत्नचित्राणि रूपाणि।। [23]

अथ ग्रहनक्षत्रदिजनितदोष परिहारार्थे विविधवनस्पतिनामुपयोगं वर्णितम्। सूर्यदोषनिवारणार्थे वर्णितमाह यथोक्तम्–

एलाषष्टीमधूशीरताम्रपुष्पाब्ज कुकुंमैः।
स्नानं मनः शिलादेवदारुभी रितुष्टये।। [24]

उपर्यक्तविवेचनानुसारं ज्योतिषास्त्रोक्त वनस्पतविज्ञानस्य स्वरूपेण तेन संहितास्कन्धस्य शाखा रूपेण स्वीकर्तुं शक्यन्ते। अपि च प्राचीन सनातनपरम्परायां ज्ञानविज्ञानस्य सामाजिकं–व्यावहारिकं–वैज्ञानिकञ्चस्वरूपं दृश्यन्ते। वनस्पति विज्ञानादि आधुनिक विषयापि वेदवेदांगोक्तज्ञान विज्ञानस्याभावे नैवपूर्णाः। आधुनिकविषयाः केवलं भौतिकोन्नतितत्पराः परं वैदिकज्ञानं न केवलं भौतिकमपितु 'आध्यात्मिक' शक्ति प्रदायकः।

**संदर्भ**


1. मुण्डकोपनिषदे 1/1/5
2. वेदाङ्गज्योतिषम् 4
3. बृहत्संहितायाम् 1/9
4. भावप्रकाश 1/1
5. मनुस्मृतौ 1/46–47–48
6. अथर्ववेद 8/7–23–24
7. बृहत्संहितायाम् 54/1
8. अग्नि पुराण 282/2
9. अग्नि पुराण 282/2
10. बृहत्संहितायाम् 54/31
11. बृहत्संहितायाम् 54/6
12. अग्निपुराणम् 282/8
13. बृहत्संहितायाम् 54/8
14. बृहत्संहितायाम् 54/5
15. बृहत्संहितायाम् 54/12
16. बृहत्संहितायाम् 54/14
17. महाभारत/अनुशासनपर्वणि 5/6
18. बृहत्संहिता 54/15
19. बृहत्संहिता 54/16
20. सारावल्याम् 53/4
21. सारावल्याम् 53/19
22. बृहत्पारासर होराशास्त्राम् 3/40–41
23. बृहत्संहिता 40/7
24. बृहत्संहिता 13/44